## शकि लिङ् च। (१७२/२८२३)

शकि इति प्रकृत्यर्थविशेषणम्। शक्नोत्यर्थोपाधिके [1]धात्वर्थे लिङ प्रत्ययो भवति, चकारात् कृत्याश्च[2]। भवता खलु भारो वोढव्यः, वहनीयः, वाह्यः। भवान् खलु भारं वहेत्। भवान् [3]इह शक्तः। सामान्यविहितानां[4] पुनर्वचनं लिङा बाधा मा भूत् इति॥

## आशिषि लिङ्लोटौ। (१७३/२१९५)

आशंसनम् आशीः, [5]अप्राप्तस्येष्टस्यार्थस्य प्राप्तुमिच्छा। प्रकृत्यर्थविशेषणं चैतत्। आशीर्विशिष्टेऽर्थे वर्तमानाद् धातोः लिङलोटौ प्रत्ययौ भवतः। चिरं जीव्याद् [6]भवान्। चिरं जीवतु भवान्। आशिषि इति किम्? चिरं जीवति देवदत्तः॥

## क्तिच्क्तौ च सञ्ज्ञायाम्। (१७४/३३१३)

आशिषि [7]इत्येव। आशिषि विषये धातोः [8]क्तिच्क्तौ प्रत्ययौ भवतः, समुदायेन चेत् सञ्ज्ञा गम्यते। तनुतात् तन्तिः। [9]सनुतात् सातिः। भवतात् भूतिः। [10]मनुतात् मन्तिः। क्तः खल्वपि – देवा एनं देयासुः [11]देवदत्तः। [12]सामान्येन विहितः क्तः पुनरुच्यते, क्तिचा बाधा मा भूत् इति। चकारो [13]विशेषणार्थः, 'न क्तिचि दीर्घश्च' (६.४. ३९/३३१४) इति[14]॥

## माङि लुङ्। (१७५/२२१९)

माङि उपपदे धातोः लुङ प्रत्ययो भवति। सर्वलकाराणामपवादः। मा कार्षीत्। मा हार्षीत्। कथं मा भवतु तस्य पापम्,[15] मा भविष्यति इति? असाधुरेवायम्। केचिदाहुः, अङिदपरो माशब्दो विद्यते, तस्यायं प्रयोगः[16]॥

## स्मोत्तरे लङ् च। (१७६/२२२०)

[17]स्मशब्दोत्तरे माङि उपपदे धातोः [18]लङ प्रत्ययो भवति, चकाराल् लुङ च। मा स्म करोत्। मा स्म कार्षीत्। मा स्म हरत्। मा स्म हार्षीत्॥

इति [19]श्रीजयादित्यविरचितायां काशिकायां वृत्तौ
तृतीयाध्यायस्य तृतीयः पादः॥

---

1. अर्थे वर्तमानात् धातोः फ. ह. 2. भवन्ति इत्यधिकम् फ. 3. हि फ. ह. 4. कृत्यानां इत्यधिकम् फ. ह. 5. अप्राप्तस्य नास्ति ब. फ. 6. भवान् नास्ति ब. 7. वाक्यमिदं नास्ति फ, इति वर्तते ह. 8. क्तिच् क्तश्च फ, क्तिच् प्रत्ययो भवति क्तश्च ह. 9. उदाहरणमिदं नास्ति ह. 10. उदाहरणमिदं नास्ति फ. 11. यज्ञदत्तः ब. ह. 12. सामान्यविहितः ह. 13. विशेषणार्थः नास्ति फ. 14. विशेषणार्थः इत्यधिकम् फ. 15. इति इत्यधिकम् फ. 16. इति इत्यधिकम् फ. ह. 17. स्मशब्दसहिते फ. ह. 18. लिङ ह. 19. श्रीजयादित्यविरचितायां नास्ति ग. ह.